अशौचिनां गृहाद्ग्राह्यं शुष्कान्नमेवनित्यशः ॥"
इति कौर्म्मे उपविभागे २२ अध्यायः ॥
अन्यत् याज्ञोत्तरखण्डे १०९ अध्याये द्रष्टव्यम् ॥

शौचाचारः, पुं, (शौचः आचारः ।) शुद्धिकर्म्म । यथा,—
"शौचाचारविहीनस्य समस्ता निष्फलाः
क्रियाः ॥"
इत्याह्निकाचारतत्त्वे ब्रह्मपुराणम् ॥
अन्यच्च ।
"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥"
इति याज्ञवल्क्यः ॥

शौचिकः, पुं, (शौचं गृहादेः शुचिता कार्य्यत्वेनास्त्यस्येति । शौच+ठन् ।) वर्णसङ्करविशेषः । यथा,—
"कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥

शौचेयः, पुं, (शौचेन वस्त्रादिशुचित्वेन व्यवहरतीति । शौच+ढक् ।) रजकः । इति शब्दरत्नावली ॥

शौट, ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अशुशौटत् । शौटति वीरः । इति दुर्गादासः ॥

शौटीरः, पुं, ( शौटतीति । शौट गर्व्वे+"कृशृपृकटिपटिशौटिभ्यः ईरन् ।" उणा० ४ । ३० । इति ईरन् ।) त्यागी । वीरः । इत्युणादिकोषः ॥ गर्व्वान्विते, त्रि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, महाभारते । १२ । ८३ ।४२ ।
"सन्तुष्टः सम्मतः सत्यः शौटीरो द्वेष्यपापकः ।
मन्त्रवित् कालवित् शूरः समन्त्रं श्रोतुमर्हति ॥")

शौटीर्य्यं, क्ली, ( शौटीरस्य भावः कर्म्म वा । शौटीर+"गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ ।१।१२४ । इति ष्यञ् । ) वीर्य्यम् । इति शब्दरत्नावली ॥ गर्व्वः । शौटीरशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

शौड ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सेट् । ) चतुर्द्दशस्वरी । ऋ, अशुशौड़त् । इति दुर्गादासः ॥

शौण्डः, त्रि,(शुण्डायां मद्ये रतः । शुण्डा+अण् ।) मत्तः । इत्यमरः ॥ (यथा, महाभारते । ३ २३३ । ११ ।
"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्ज्याः ॥")

शौण्डिकः, पुं,(शुण्डा पण्यमस्य । शुण्डा+"तदस्य पण्यम् ।" ४।४।५१ । इति ठक् ।) जातिविशेषः । शुंड़ी इति भाषा । तत्पर्य्यायः । मण्डहारकः २ इत्यमरः ॥ शुण्डारः ३ शौण्डी ४ शुण्डकः ५ । इति शब्दरत्नावली ॥ ध्वजः ६ पानः ७ पणः ८ । इति जटाधरः ॥ कल्पपालः ९ सुराजीवी १० । वारिवासः ११ पानवणिक् १२ ध्वजी १३ । आसुतीवलः १४ । इति हेमचन्द्रः ॥ तस्योत्पत्तिर्यथा,—
"ततो गान्धिककन्यायां कैवर्त्तादेव शौण्डिकः ।
कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥
(अस्य गृहे भोजननिषेधो यथा, मनुः । ४ । २१६ ।
"स्ववतां शौण्डिकानाञ्च चैलनिर्णेजकस्य च ।
रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥"
एषां गेहे नाद्यात् इत्यर्थः ॥*॥ शुण्डिकागते, त्रि, । अत्र "शुण्डिकादिभ्योऽण् ।" ४ । ३ । ७६ । इत्यण् ॥)

शौण्डी, [न्] पुं, (शुण्डा सुरा एव शौण्डं मद्यम् । स्वार्थे अण् । तत् पण्यत्वेनास्त्यस्येति । शौण्ड+इन् ।) शौण्डिकः । इति शब्दरत्नावली ॥

शौण्डी, स्त्री, (शुण्डायां मद्यपानगेहे भवा । मत्तानां रुचिप्रदत्वात् । शुण्डा+अण् । ङीप् ।) पिप्पली । चव्यम् । इति विश्वः ॥

शौण्डीरः, त्रि, (शौटतीति । शौट+ईरन् । पृषोदरादित्वात् साधुः । ) अहङ्कारी । यथा,—
"शौण्डीरो गर्व्वितस्तब्धो मानी चाहङ्कृदुद्धतः ।
उदग्रीव उद्धरोऽकल्पो नीचश्च पिशुनोऽधमः ॥"
इति धनञ्जयकोषः ॥

शौद्धोदनिः, पुं, (शुद्धोदनस्यापत्यं पुमानिति । शुद्धोदन+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शाक्यवंशावतीर्णबुद्धमुनिविशेषः । इत्यमरः ॥ "शुद्धमोदनस्य इति मनीषादिः । शुद्धोदनो नाम राजा । तथाहि ।
"शुद्धोदनो यतो भुङ्क्ते न्यायवत् शुद्धमोदनम् ।"
इत्यौषाभिधानम् ॥
शुद्धोदनस्यापत्यं शौद्धोदनिः । बाह्वादेत इति णिः ।" इति भरतः ॥

शौद्रः, पुं, (शूद्रायां भवः । शूद्रा+अण् ।) द्वादशविधपुत्रान्तर्गतपुत्त्रविशेषः । स तु ब्राह्मणक्षत्त्रियवैश्यान्यतमात् शूद्रायां जातः । यथा,—
"औरसः क्षेत्रजो दत्तो गूढ़ोत्पन्नश्च कृत्रिमः ।
क्रीतापविद्धकानीनशौद्रपौनर्भवा अपि ॥
स्वयं दत्तः सहोढ़ोऽपि द्वावुरस्यौरसौ समौ ॥"
इति जटाधरः ॥
(यथा, मनुः । ९ । १६० ।
"कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड़दायादबान्धवाः ॥"*॥
शूद्रस्येदमिति । अण् । ) शूद्रसम्बन्धिनी, त्रि, ॥
( यथा, महाभारते । १२ । ६२ । ४ ।
"क्षात्त्राणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन् ।
अस्मिंल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति ॥")

शौधिका, स्त्री, रक्तकङ्गुः । इति हेमचन्द्रः ॥

शौनकः, पुं,(शुनकस्यापत्यमिति । शुनक+"अनृष्यानन्तर्य्ये विदादिभ्योऽञ्" । ४ । १ । १०४ । इति अञ् । मुनिविशेषः । यथा,—
"सपिण्डीकरणादूर्द्ध्वं न दद्यात् प्रतिमासिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः ॥"
इति तिथ्यादितत्त्वम् ॥

शौनिकः, (शूना प्राणिवधस्थानं प्रयोजनमस्य । शूना+ठक् । ) मांसविक्रयकर्त्ता । यथा,—
'वैतंसिकःकौटिकश्च मांसिकः शौनिकः समाः ।'
इति जटाधरः हेमचन्द्रश्च ॥
मृगया । इति शब्दमाला ॥

शौभं, क्ली, ( शोभायै हितम् । शोभा+अण् ।) हरिश्चन्द्रपुरम् । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । व्योमचारिपुरम् २ । इति भूरिप्रयोगः ( पुरमेतत् शाल्वस्य नृपतेरासीत् । कृष्णेनेदं विनाशितम् । एतद्वृत्तान्तस्तु भागवते १० स्कन्धे ७७ अध्याये द्रष्टव्यः ॥ )

शौभः, पुं, (शुभाय हितः । शुभ+अण् ।) देवता इति त्रिकाण्डशेषः ॥ गुवाकः । इति शब्दमाला ॥

शौभनेयः, त्रि, शोभनसम्बन्धी । शोभनशब्दात् ण्येयप्रत्ययेन निष्पन्नः ॥

शौभाञ्जनः, पुं, (शोभाञ्जन एव । स्वार्थे अण् ।) शोभाञ्जनवृक्षः । इति भरतद्विरूपकोषः ॥

शौभिकः, पुं, ( शौभं व्योमचारिपुरं उपलक्षणेन तद्वदाश्चर्य्यकरं वस्तु साधनत्वेनास्त्यस्येति । शौभ+ठन् । ) इन्द्रजालिकः । इति शब्दमाला ॥

शौभ्रेयः, त्रि, (शुभ्रा+"शुभ्रादिभ्यश्च ।" ४ ।१। १२३ । इति ढक् ।) शुभ्राया अपत्यम् । इति मुग्धबोधव्याकरणम् ॥ शुभ्रसम्बन्धिनि च ॥

शौरिः, पुं, ( शूरस्यापत्यमिति । शूर+इञ् । ) विष्णुः । (यथा, आनन्दलहर्य्याम् २ ।
"तनीयांसं पांशुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम्
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुभ्यैनं भजति भसितोद्धूननविधिम् ॥")
शनैश्चरग्रहः । इत्यमरभरतौ ॥ ( शूरवंशीयमात्रे । वसुदेवः । यथा, भागवते ।३।१।२६ ।
"कच्चित् कुरूणां परमः सुहृन्नो
भामः स आस्ते सुखमङ्गशौरिः ॥"
बलदेवः । यथा, महाभारते । ५ । ७ । २५ ।
"ततोऽभ्ययाद्भीमबलो रौहिणेयं महाबलम् ।
सर्व्वञ्चागमने हेतुं स तस्मै संन्यवेदयत् ।
प्रत्युवाच ततः शौरिर्धार्त्तराष्ट्रमिदं वचः ॥"
कृष्णः । यथा, भागवते । १ । १० । ३३ ।
"अथ दूरगतान् शौरिः कौरवान् विरहातुरान् ।
संनिवर्त्त्य दृढ़ं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥")

शौर्पः, } त्रि, (शूर्प+"शूर्पादन्यतरस्याम् ।"
शौर्पिकः, } ५ । १ । २६ । इति अञ् पक्षे ठञ् । शूर्पपरिमितम् । शूर्पशब्दात् अण्प्रत्ययेन ठिकप्रत्ययेन च निष्पन्नौ ॥

शौर्य्यं, क्ली, ( शूरस्य भावः कर्म्म वा । शूर+ष्यञ् । ) शक्तिः । ( यथा, रामायणे । ६ । १५ । ३ ।